# Skandaproktam Kalanathashtakam

# સ્કન્દપ્રોક્તં કાલનાથાષ્ટકમ્

## Document Information

Text title : Kalanathashtakam Skandaproktam

File name : kAlanAthAShTakam.itx

Category : shiva, aShTaka

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mahAdevAkhyaH ekAdashamAMshaH | adhyAyaH 26 | 67-76.1||

Latest update : October 7, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 7, 2024

*sanskritdocuments.org*

# સ્કન્દપ્રોક્તં કાલનાથાષ્ટકમ્

(શિવરહસ્યાન્તર્ગતે મહાદેવાખ્યે)
ભૈરવં પૂજયેદ્ભક્ત્યા સ્રગ્ગન્ધાભરણાર્ચનૈઃ ।
હવિષા વાપિ તામ્બૂલૈર્માષાપૂપૈઃ સમર્ચયેત્ ॥ ૬૭॥

કાશ્યાં નિર્વિઘ્નવાસાય ભૌમાષ્ટમ્યાં વિશેષતઃ ।
સમ્પૂજ્ય સંસ્તુવીતૈવં કાશ્યાં શ્રીકાલભૈરવમ્ ॥ ૬૮॥

કપાલમાલિકાકણ્ઠં જ્વલત્પાવકલોચનમ્ ।
કપાલકરમત્યુગ્રં કલયે કાલભૈરવમ્ ॥ ૬૯॥

મણિપાદુકપાદાબ્જં મહાશૂલકરામ્બુજમ્ ।
કન્થાકઞ્ચુકસઙ્ક્રાન્તં કલયે કાલભૈરવમ્ ॥ ૭૦॥

દિગમ્બરં જપાવર્ણં જરામરણવર્જિતમ્ ।
ચારુચન્દ્રજટાજૂટં કલયે કાલભૈરવમ્ ॥ ૭૧॥

બાલભાનુપ્રભાકારં નીલકોમલકઞ્ચુકમ્ ।
જ્વલદ્દણ્ડકપાલાઢ્યં કલયે કાલભૈરવમ્ ॥ ૭૨॥

સુરારિવરદાવાગ્નિં સુરકૈરવશીતગુમ્ ।
શિવાજ્ઞાકારકં સાક્ષાત્ કલયે કાલભૈરવમ્ ॥ ૭૩॥

યસ્યાજ્ઞયા જગત્સર્વં સ્થાવરં જઙ્ગમં તથા ।
વર્તતે નિર્ભયં કાશ્યાં કલયે કાલભૈરવમ્ ॥ ૭૪॥

ય ઇદં કાલનાથસ્ય પઠેદ્ભક્ત્યાઽષ્ટકં નરઃ ।
સ એવ લભતે કાશીં નિર્વિઘ્નેન શિવાજ્ઞયા ॥ ૭૫॥

તત્રૈવ વસતે જન્તુઃ પૂજનસ્તવનેન ચ । ૭૬।૧

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સ્કન્દપ્રોક્તં કાલનાથાષ્ટકં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । મહાદેવાખ્યઃ એકાદશમાંશઃ । અધ્યાયઃ ૨૬ । ૬૭-૭૬.૧॥

- .. shrIshivarahasyam . mahAdevAkhyaH ekAdashamAMshaH . adhyAyaH 26 . 67-76.1 ..

Notes:

Skanda delivers Upadeśa ઉપદેશ about reciting the Kālanāthāṣṭakam કાલનાથાષ્ટકમ્ for eulogizing Śiva શિવ as Kālabhairavam of Kāśī કાશ્યાં કાલભૈરવમ્ and worshiping Him especially on Bhaumāṣṭamī ભૌમાષ્ટમી.

(કાલભૈરવસ્તુતિઃ KālabhairavaStutiḥ)

Proofread by Ruma Dewan

*Skandaproktam Kalanathashtakam*

pdf was typeset on October 7, 2024

Please send corrections to *sanskrit@cheerful.com*